## शास्त्री - व्याकरणम्

**फलितांशाः (Out Comes) -**

एतस्य कार्यक्रमस्य परिणामाः -

1. व्याकरणस्य सर्वशास्त्रमुखस्थानीयत्वात् सर्वशास्त्रप्रवेशार्थं सुगमता।
2. साधुशब्दज्ञानेन भाषासौष्ठवः।
3. भाषान्तरशिक्षणे सामर्थ्यावाप्तिः।
4. वर्णपदवाक्यानामुचितसंनिवेशसामर्थ्यम्।
5. काव्यनाटकादिनिर्माणाय शब्दकोशेऽधिकारः।
6. वेदपुराणपारायणदक्षतया अदृष्टप्राप्तिः।
7. वाङ्गलापनोदनम्।
8. स्वरतन्त्रीणां स्वरमात्रादिज्ञानपूर्वकोच्चारणेन समुचितविकासः।
9. भाषाविज्ञानरहस्यावबोधाय विवेकोपलब्धिः।
10. स्नातकैः प्राप्तुं शक्यानाम् उद्योगावकाशानामवसरः।
11. विविधप्रतियोगिपरीक्षासु संस्कृतविषयमवलम्ब्य (I.A.S., R.A.S., etc.) भागार्हता।
12. संस्कृतभाषायाः सम्यग्ज्ञानपूर्वकं प्रयोगकौशलम्।
13. शिक्षाशास्त्रिकार्यक्रमे प्रवेशार्हता।
14. पाणिनीयसूत्राणां तर्कसङ्गतां सूत्रशैलीं च ज्ञात्वा सङ्गणकस्य सम्यग्ज्ञानपुरस्सरं नवाचारकुशलता।
15. सैन्यवर्गे पण्डितपदलाभः।
16. पारम्परिकस्नातकोत्तरकक्षायां प्रवेशार्हता।
17. आधुनिकधारायां संस्कृत एम. ए. कृते प्रवेशार्हता।
18. भारतीयसेनायां धर्मगुरुपदे नियोगावसरः।

## शास्त्री (प्रतिष्ठा) - व्याकरणम्

1. गभीरशास्त्रीयज्ञानेन व्यक्तित्वविकासः।
2. धारणाशक्तेः विकासेन भौतिकजीवने साफल्यम्।
3. स्नातकोत्तरपाठ्यक्रममधिगन्तुं समुचितसामर्थ्यम्।
4. शास्त्रान्तरेषु (काव्यादौ) समुचितप्रवेशेन नैतिकचारित्रिकविकासः।
5. प्रगतसंस्कृतज्ञानेन आगामिनः समकालिकस्य चाह्वानस्य कृते सामर्थ्यम्।
6. ई-संस्कृत, संस्कृतपोर्टल इत्यादीनां संसाधने निःसन्दिग्धप्रवृत्तिः।
7. व्याकरणशास्त्रस्य सामान्यज्ञानमधीत्य विशिष्टव्याकरणशास्त्रतत्त्वस्य प्राप्त्यर्थमवसरः।
8. महाभाष्यस्य द्वयोः आह्निकयोः सम्यक्तया ज्ञानं प्राप्य महाभाष्यस्य तत्त्वमवगन्तुं क्षमता।
9. स्नातकोत्तरकक्षायामध्येतुं सुदृढं पूर्वज्ञानम्।
10. शास्त्रिव्याकरणे पूर्वोक्तस्य फलितांशस्य सकलस्य प्राप्तिः।

## आचार्यः - व्याकरणम्

1. व्याकरणशास्त्रीयपरम्परायाः ज्ञानेन ताम्अग्रेसारयितुं सामर्थ्यावाप्तिः।
2. वैदिकवाङ्मयालोडनाय बौद्धिकविकासः।
3. स्मृतिपुराणादीनामालोचनसामर्थ्यम्।
4. यू.जी.सी. परीक्षाकृते अर्हता, साफल्यसम्भावना च।
5. कनिष्ठ-वरिष्ठाध्येतावृत्तिलाभः।
6. महाविद्यालये, विश्वविद्यालये चाध्यापकत्वेन अवसरः।
7. शोधप्रतिष्ठानेषु गवेषणाय अवसरः।
8. प्रिण्टमीडिया-इलेक्ट्रोनिकमीडियाकृते अधिकृतपाठ्यक्रमे प्रवेशार्हता।
9. शास्त्रान्तरे समीक्षणसामर्थ्यम्।
10. विद्यावारिधि (Ph.D.) कृते प्रवेशार्हता।
11. पाणिनि-पतञ्जलिकालिकेन सामाजिक-आर्थिक-राष्ट्रियादिस्थितिज्ञानेन तत्तदुत्तरदायित्वं निर्वोढुं प्रवृत्तिः।
12. वैयाकरणसिद्धान्तनिरूपणाध्यनेन निर्णयक्षमताया विकासः।
13. स्वकीये पारिवारिके, सामाजिके च जीवने वाक्पाटवेन सामञ्जस्यं स्थापयितुं व्यक्तित्वविकासः।
14. पाश्चात्त्यैः कृतस्य शास्त्रीयापव्याख्यानस्य खण्डनं कर्त्तुं वस्तुतत्त्वञ्च पुरस्कर्त्तुं सामर्थ्यलाभः।
15. शास्त्रव्यवहारयोः समन्वयस्थापने प्रतिभाविकासः।
16. किञ्चित्प्रशिक्षणमवाप्य विद्यालये जीविकावसरः।
17. वैदेशिकसंस्कृतक्रियाकलापे वृत्तिलाभावसरः।
18. शास्त्रि-शास्त्रिप्रतिष्ठाखण्डे उत्तमस्य फलितांशस्य च लाभः।

## विद्यावारिधिः (Ph.D.) व्याकरणम्

1. प्राचीनपाण्डुलिपीनामुद्धारः, येन अद्यावधि अज्ञातबहुमूल्यानां ज्ञान-विज्ञान-प्रज्ञानानां प्रकाशनेन विश्वकल्याणाय नवोन्मेषः।
2. सङ्कलना-कलन-समीक्षण-विश्लेषण-परिशीलन-निष्कर्षणादि-जीवनोपयोगिप्रातिभानां समुत्कर्षः।
3. महाविद्यालय-विश्वविद्यालया-नुसन्धानकेन्द्रादौ जीविकावसरः।
4. शोधपरियोजनायां वृत्त्युपलब्धिः।
5. वेतने वृद्धिः।
6. ग्रन्थसम्पादन-लेखनकलावाप्तिः।
7. शोधप्रज्ञायाः विकासेन भारतीयज्ञानपरम्परायामवगाहने प्रावीण्यम्।
8. पाणिनि-पतञ्जलिप्रभृतिशाब्दिकाचार्य्याणां शैलीप्रज्ञया स्वस्मिन् सारस्वतजीवने अनुकरणेन गवेषकाणां महती शैक्षिकोपलब्धिः।
9. वस्तुतत्त्वपरीक्षणाय आवश्यकदृष्टिप्राप्तिः।
10. वैज्ञानिक-यान्त्रिक-तान्त्रिकादिशब्दानां कृते संस्कृतशब्दनिर्माणकौशलम्।
11. प्राच्यपाश्चात्त्यदृष्ट्या नूतनशोधनशक्तेः प्राप्तिः।
12. पत्र-पत्रिकादौ शोधलेख-स्तम्भलेखादिप्रकाशनेन अर्थोपार्जनम्।
13. समसायिकविषयोपरि अकाट्यतर्केण इलेक्ट्रोनिकसञ्चारमाध्यमे वादविवादे प्रतिभागितया यशसः, अर्थस्य च लाभः।
14. भारतीयसंस्कृतौ क्रियमाणाक्षेपाणां युक्त्या निरसनकौशलम्।
15. वैश्विकपटले संस्कृतस्य वैज्ञानिकतायाः, सत्यं शिवं सुन्दरम् इति सिद्धान्तस्य, वसुधैव कुटुम्बकमिति मानवदर्शनस्य स्थापनम्।
16. 'शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छती'ति सिद्धान्तप्रतिपादनेन जनानामाध्यात्मिको विकासः।